# DPA – 510 SAN (F)

**First Year M.A. Examination, August/September 2008**
**Directorate of Correspondence Course**
**SANSKRIT**
**Paper – I : Classical Lit. – 1**
**(Freshers)**
**Texts : 1) Kirātārjuniyam I and II Cantos**
**2) Mahaśvetāvṛttanta of Kadambari**

Time : 3 Hours                                                                 Max. Marks : 80

***Note** : Answer either in **Kannada** or **English** or **Sanskrit**.*

I. एतेषु पद्यद्वयं विवृणुत ।                                                                 12

1) क्रियासु युक्तैर्नृप! चारचाक्षुषो न वञ्चनीया प्रभवोऽनुजीविभिः ।
अतोऽर्हसि क्षन्तमसाधु साधु वा हितं मनोहारि च दुर्लभं वचः ॥

2) द्विषन्निमित्ता यदियं दशा ततः समूलमुन्मूलयतीव मे मनः ।
परैरपर्यासितवीर्यसम्पदां पराभवोऽप्युत्सव एव मानिनाम् ॥

3) अनुपालयतामुदेष्यतीं प्रभुशक्तिं द्विषतामनीहया ।
अपयान्त्यचिरान्महीभुजां जननिर्वादभयादिव श्रियः ॥

II. अनयोः गद्यभागयोरेकं सानुवादं व्याख्यात ।                                                 12

1) तेन च कर्णावतंसीकृतां वसन्तदर्शनानन्दितायाः स्मितप्रभामिव वनश्रियः, मलयमारुतागमनार्घलाजाञ्जलिमिव मधुमासस्य, यौवनलीलामिव कुसुमलक्ष्म्याः सुरतपरिश्रमस्वेदकणजालकावलीमिव रतेः, ध्वजचिह्नचामरपिच्छिकामिव मनोभवगजस्य, मधुकरकामुकाभिसारिकां, कृत्तिकातारास्तबकानुकारिणीम्, अमृत बिन्दुमिवस्यन्दिनीम्, अदृष्टपूर्वां कुसुममञ्जरीमद्राक्षम् ॥

2) सखे पुण्डरीक सुविदितमेतन्मम । केवलमिदमेव पृच्छामि । यदेतदारब्धं भवता किमिदं गुरुभिरूपदिष्टम् । उत धर्मशास्त्रेषु पठितम् । उत धर्मार्जनोपायोऽयम् । उतापरस्तपसांप्रकारः । उत स्वर्गगमनमार्गोयम् । उत व्रतरहस्यमिदम् । उत मोक्षप्राप्तियुक्तिरियम् । आहोस्विदन्यो नियमप्रकारः । कथमेतद्युक्तं भवतो मनसापि चिन्तयितुं, किं पुनराख्यातुमीक्षितुं वा । मूढो हि मदनेनायास्यते ।

III. भारवेः शैलिमधिकृत्य प्रबन्धमेकं रचयत ।                                                 12

अथवा

द्रौपद्याः वचनमधिकृत्य लिखत ।

IV. 'बाणोच्छिष्टं जगत्सर्वं' – विशदीकुरुत ।                                                   12

अथवा

पुण्डरीकस्य पात्रचित्रणं कुरुत ।

P.T.O.

V. 'क' विभागाद् 'द्वयं', 'ख' विभागाद् 'द्वयं' च ससन्दर्भं व्याख्यात। **12**

**'क' विभाग:**

1) गुणानुरोधेन विना न सत्क्रिया।

2) प्रवृत्तिसारा: खलु मादृशां गिर:।

3) आगम: कुरुते दीप इवार्थदर्शनम्।

4) न तितिक्षासममस्ति साधनम्।

**'ख' विभाग:**

1) शिष्य इव तां व्रजन्तीमनुवव्राज।

2) जनयति प्रभुप्रसाद लवोऽपि प्रागल्भ्यमधीरप्रकृते:।

3) अदृष्टपूर्वां कुसुममञ्जरीमद्राक्षम्।

4) सखे कपिञ्जल किं मामन्यथा संभावयसि।

VI. a) **संस्कृतभाषायां अनुवादं कुरुत।** **10**

ಪರಿಪೂರ್ಣ ಮತ್ತು ಫಲಭರಿತ ಬದುಕಿಗೆ ವಿಶ್ವಾಸವೇ ಬುನಾದಿ. ಸಂತಸ ಮತ್ತು ನೆಮ್ಮದಿಯ ಬದುಕಿನ ರಹಸ್ಯವೇ ಅದು. ವಿಶ್ವಾಸ ಇಲ್ಲದಿದ್ದರೆ ಬಾಳೆಲ್ಲ ಗೋಳು. ಹಾಗಾಗದೆ ಬಾಳು ನಿತ್ಯೋತ್ಸವವಾಗಬೇಕು. ಅದಕ್ಕೆ ವಿಶ್ವಾಸದಲ್ಲಿ ನಾವು ಬದುಕಬೇಕು. ಈ ವಿಶ್ವಾಸ ಮೂರು ಸ್ತರಗಳಲ್ಲಿ ಅಭಿವ್ಯಕ್ತಗೊಳ್ಳುತ್ತದೆ. ಅವೆಂದರೆ, ವಿಶ್ವದ ಸೃಷ್ಟಿಕರ್ತನಾದ ಈಶ್ವರನಲ್ಲಿರುವ ವಿಶ್ವಾಸ. ನಮಗೆ ನಮ್ಮ ಮೇಲಿರುವ ವಿಶ್ವಾಸ ಮತ್ತು ನಮ್ಮ ಸುತ್ತಲಿರುವ ವ್ಯಕ್ತಿಗಳಲ್ಲಿ ನಮಗಿರುವ ವಿಶ್ವಾಸ

The foundation for a complete and fruitful life is faith. It is the secret of a contentedly and happy life. Without faith life becomes miserable. Life should not be so. Instead it should ever become a festivity. For this we should lead life in faith. This faith is seen in three main spheres. They are faith in God who is the creater of the universe, faith in ourself and faith in the people around us.

b) **कर्णाटकभाषायां आङ्ग्लभाषायां वा अनुवादं कुरुत।** **10**

वसिष्ट: क्षणं ध्यानं कृत्वा प्रीत्या अवदत्–भो राजन्, पूर्वं त्वं इन्द्रस्य सहायार्थं स्वर्गम् अगच्छ:। पुनरागमनसमये त्वया कामधेनु: न दृष्टा उदासिता च। क्रुद्धा सा त्वाम् अशपत्। अत: त्वं अपुत्रक: भवसि। मदीये आश्रमे तस्या: पुत्री नन्दिनी वसति। तां भक्त्या श्रद्धया चार्चय। तस्या: प्रसाद एव शापस्य परिहार: इति।

**अथवा**

द्वयो: अर्थविस्तरणं कुरुत। (संस्कृत भाषायां) **20**

1) विद्या विनयेन शोभते।

2) सर्वे गुणा: काञ्चनमाश्रयन्ते।

3) प्रजा सुखे सुखं राज्ञ:।

---

DPA – 520 SAN (F)

**First Year M.A. Sanskrit Examination, August/September 2008**
**Directorate of Correspondence Course**
**(Freshers)**
**Paper – II : CLASSICAL LITERATURE – II**
**Texts : 1) Abhijnāna Śākuntalam**
**2) History of Classical Sanskrit Lit.**

Time : 3 Hours — Max. Marks : 80

*Note : Answer either in **Kannada** or **English** or **Sanskrit**.*

I. a) नाटकेषु अभिज्ञानशाकुन्तलस्य महत्त्वं प्रतिपादयत। **10**

**अथवा**

दुष्यन्तस्य पात्रचित्रणं कुरुत ।

b) द्वयमधिकृत्य लघु टिप्पणीं लिखत । **8**

1) दुर्वासशाप प्रसंग
2) नान्दी ।
3) शाकुन्तलनाटके रसः ।
4) अनसूया ।

II. a) अधोनिर्दिष्टेषु द्वयं सानुवादं विमृशत । **10**

1) ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने दत्तदृष्टिः
पश्चार्धेन प्रविष्टः शरपतनभयाद्भूयसा पूर्वकायम् ।
दर्भैरर्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा
पश्योदग्रप्लुतत्वाद्वियति बहुतरं स्तोकमुर्व्यां प्रयाति ।।

2) शुश्रूषस्व गुरून्कुरु प्रियसखीवृत्तिं सपत्नीजने
भर्तृविप्रकृतापि रोषणतया मा स्म प्रतीपं गमः ।
भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः ।।

3) शैलानामवरोहतीव शिखरादुन्मज्जतां मेदिनी
पर्णाभ्यन्तरलीनतां विजहति स्कन्धोदयात्पादपाः ।
संतानैस्तनुभावनष्टसलिला व्यक्तिं भजन्त्यापगाः
केनाप्युत्क्षिपतेव पश्य भुवनं मत्पार्श्वमानीयते ।।

P.T.O.

b) अधोनिर्दिष्टेषु चत्वारि ससन्दर्भं व्याख्यात । 10

1) भवितव्यतानां द्वाराणि भवन्ति सर्वत्र ।

2) सर्वः कान्तमात्मीयं पश्यति ।

3) अतिस्नेहः पापशङ्की ।

4) उत्सवप्रियाः खलु मनुष्याः ।

III. महाकाव्यक्षेत्रंप्रति भारवेः योगदानं निर्धरत । 10

अथवा

संस्कृते विद्यमानानि खण्डकाव्यानि अधिकृत्य विवृणुत । 10

IV. संस्कृतरूपकस्य उगमं विकासञ्चाधिकृत्य प्रबन्धं आरचयत ।

अथवा

चंपूकाव्यं नाम किं ? विवृणुत ।

V. संस्कृतपद्यकाव्यक्षेत्रे रामायणस्य प्रभावं निर्धरत । 10

अथवा

महाकाव्यस्य लक्षणानि निरूपयत ।

VI. त्रयमाधिकृत्य टिप्पणीः लिखत । 12

1) दण्डी ।

2) पञ्चतन्त्रम् ।

3) माघः ।

4) मालविकाग्निमित्रम् ।

5) मध्यमव्यायोगः ।

# DPA – 530 SAN (F)

**I Year M.A. Examination, August/September 2008**
**Directorate of Correspondence Course**
**(Freshers)**
**SANSKRIT**
**Paper – III : Vyākaraṇa and Bhāratīya Tattva Śāstra**

**Texts :** a) **Siddhāntakaumudī (From Kāraka to Prādisamāsa)**
b) **Nyāyadarśana (I and II chapts.)**
c) **Sarvadarśana Saṃgraha (Cārvāka, Bauddha, Rāmānuja and Pūrṇaprajña)**

Time : 3 Hours | Max. Marks : 80

*Note : Answer either in Kannada or English or in Sanskrit.*

AUGUST SEPTEMBER EXAM 2008

I. चत्वारि सोदाहरणं विवृणुत : 10

1) अधिशीङ्स्थासां कर्म ।

2) सहयुक्तेऽप्रधाने ।

3) क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः ।

4) भीत्रार्थानां भयहेतुः ।

5) अव्ययीभावे शरत्प्रभृतिभ्यः ।

6) सप्तमी शौण्डैः ।

7) विशेषणं विशेष्येण बहुलम् ।

II. कर्मकारकस्य **अथवा** अधिकरणकारकस्य स्वरूपं ससूत्र सोदाहरणं निरूपयत । 8

III. **चतुर्णां** पदानां विग्रहवाक्यानि सूत्रानुसारेण लिखत : 10

1) अधिगोपम् ।
2) दुःखापन्नः ।
3) देवपूजकः ।
4) महावैयाकरणः ।
5) राजान्तरम् ।
6) अनुपलब्धिः ।
7) गेहेशूरः ।
8) कुपुरुषः ।

P.T.O.

IV. उपमानप्रमाणसिद्धिं सयुक्तिकं कुरुत । 10

**अथवा**

हेत्वाभासान् न्यायदर्शनमनुसृत्य निरूपयत ।

V. a) त्रीणि सूत्राणि विवृणुत : 9

1) पुनरुत्पत्तिः प्रेत्यभावः ।

2) विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः ।

3) साधर्म्य वैधर्म्याभ्यां प्रत्यवस्थानं जातिः ।

4) पश्चात्सिद्धौ न प्रमाणेभ्यः प्रमेयसिद्धिः ।

5) हेत्वपदेशात् प्रतिज्ञायाः पुनर्वचनं निगमनम् ।

b) त्रयाणां लघुटिप्पणी लिखत : 9

1) आकाशम् ।

2) तर्कः ।

3) छलम् ।

4) अनुवादः ।

5) मूर्तिः ।

VI. a) चार्वाकदर्शनमनुसृत्य चैतन्य स्वरूपं निरूपयत । 12

**अथवा**

'विष्णोः सर्वोत्कर्ष एव तात्पर्यं सर्वागमानाम्' – उपपादयत ।

b) त्रीणि अधिकृत्य टिप्पणीः रचयत : 12

1) चार्वाकमते मनः ।

2) मध्वाचार्याः ।

3) बौद्धदर्शने प्रत्यक्षम् ।

4) अभिगमनम् ।

5) ध्यानम् ।

6) शास्त्रस्वरूपम् ।

AUGUST SEPTEMBER EXAM 2008

# DPA – 540 SAN (F)

**M.A. (Previous) Sanskrit Examination, August/September 2008**
**Directorate of Correspondence Course**
**Paper – IV : SPECIAL ALANKARA – I (Freshers)**

**a) Appayya Dixita's Kuvalayananda (Uparna to Vyatirekha)**
**b) Dhvanyaloka – 1-2 Chapters only**
**c) Theories of Alankara and Riti**

Time : 3 Hours  Max. Marks : 80

*सूचना: उत्तराणि संस्कृतभाषया, कन्नडभाषया, आंग्लभाषया वा लिखत ।*

AUGUST SEPTEMBER EXAM 2008

I. अलंकारशास्त्रंप्रति वामनस्य अथवा भामहस्य योगदानं निरूपयत । **10**

II. चत्वारि अधिकृत्य सोदाहरणं विवृणुत । **12**

1) पूर्णोपमा ।

2) भ्रान्तिमान् ।

3) सन्देहः ।

4) उल्लेखः ।

5) दृष्टान्तः ।

6) दीपकम् ।

III. अतिशयोक्ति अथवा उत्प्रेक्षालंकारं व्याख्यात । **10**

IV. एतेषां चतुरः अलंकारान् निर्दिश्य विवृणुत । **12**

1) धर्मोऽर्थ इव पूर्णश्रीरर्थो धर्म इव त्वयि ।

2) अयमास्ते विना शम्भुः तार्तीयीकं विलोचनम् ।

3) पश्यनीलोत्पलद्वन्द्वात् निःसरन्ति शिताः शराः ।

4) तापेन भ्राजते सूरः शूरश्चापेन राजते ।

5) शैला इवोन्नत सन्ताः किन्तु प्रकृतिकोमलाः ।

6) इन्दुरिन्दुरिवश्रीमान् इत्यादौ तदनन्वयः ।

P.T.O.

V. 'काव्यस्यात्मा ध्वनिः' – विशदयत । 12

अथवा

ध्वन्यालोकस्य मङ्गलश्लोके त्रिविधव्यंग्यं निरूपयत ।

VI. अधोनिर्दिष्टेषु चत्वारि व्याख्यात । 12

1) प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम् ।

2) भक्त्या बिभर्ति नैकत्वं रूपभेदादयं ध्वनिः ।

3) शोकः श्लोकत्वमागतः ।

4) यथा पदार्थद्वारेण वाक्यार्थः संप्रतीयते ।

5) व्यञ्जकत्वैक मूलस्य ध्वनेः स्याल्लक्षणं कथम् ?

6) काव्ये तस्मिन्नलंकारे रसादिरिति मे मतिः ।

VII. अधोनिर्दिष्टेषु चतुर्णां काव्यसौन्दर्यं विवृणुत । 12

1) सुवर्ण पुष्पां पृथिवीं चिन्वन्ति पुरुषास्त्रयः ।
शूरश्च कृतविद्यश्च यश्च जानाति सेवितुम् ।।

2) रविसंक्रान्तसौभाग्य तुषारावृतमण्डलः ।
निःश्वासान्धइवादर्शश्चन्द्रमा न प्रकाशते ।।

3) तस्या विनापि हारेण निसर्गादेवहारिणौ ।
जनयामासतुः कस्य विस्मयं न पयोधरौ ।।

4) एवं वादिनि देवर्षौ पार्श्वे पितुरधोमुखी ।
लीलाकमलपत्राणि गणयामास पार्वती ।।

5) कुपिताः प्रसन्ना अवरुदितवदना विहसन्त्यः ।
यथा गृहीतास्तथा हृदयं हरन्ति स्वैरिण्यो महिलाः ।।

6) अनुरागवती सन्ध्या दिवसस्तत्पुरः सरः ।
अहो दैवगतिश्चित्रा तथापि न समागमः ।

AUGUST SEPTEMBER EXAM 2008